## ६ षष्ठ दशकः - व्यास नारद समागमः

त्वदिच्छया देवि पुलस्त्य वाचा पराशरा द्विष्णु पुराण कर्तुः ।
मुनेर्हरि र्लोक हिताय दीपाद् अथा प्रदीपोऽजनि कृष्णनामा ॥ ६-१॥

वेदं चतुर्धा विदधत्स कृष्ण - द्वैपायनो व्यास इति प्रसिद्धः ।
वेदान्त सूत्राणि पुराणजालं महेतिहासं च महांश्चकार ॥ ६-२॥

तपः प्रवृत्तः कलविङ्क पोतं मात्रा स संलालित माश्रमान्ते ।
पश्यन्नधन्या मनपत्यतां स्वां सपुत्रभाग्यातिशयं च दध्यौ ॥ ६-३॥

सत्पुत्र लाभाय तपश्चिकीर्षुः तीव्रं महामेरु समीप मेत्य ।
आराधनीयः क इति क्षणं सः चिन्ताऽऽतुरो लोकगुरुः स्थितोऽभूत् ॥ ६-४॥

श्रीनारद स्तत्र समागतस्त्वत् कृपा कटाक्षा ङ्कुरवन्महर्षिः ।
अर्घ्यादि सम्पूजित आसनस्थः व्यासेन पृष्टः प्रहसन्निवाह ॥ ६-५॥

किं चिन्तया कृष्ण भजस्व देवीं कृपावती वाञ्छित दानदक्षा ।
अहेतुरेषा खलु सर्वहेतुः निरस्त साम्यातिशया निरीहा ॥ ६-६॥

सैषा महाशक्ति रिति प्रसिद्धा यदाज्ञया ब्रह्म रमेश रुद्राः ।
ब्रह्माण्ड सर्ग स्थिति संहृतीश्च कुर्वन्ति काले न च ते स्वतन्त्राः ॥ ६-७॥

यस्याश्च ते शक्तिभि रेव सर्व - कर्माणि कुर्वन्ति सुरासुराद्याः ।
मर्त्या मृगाः कृष्ण पतत्रिणश्च शक्ते र्विधेयाः क इहाविधेयः ॥ ६-८॥

प्रत्यक्ष मुख्यैर्न च सा प्रमानैः ज्ञेया तपोभिः कठिनैर्व्रतैश्च ।
न वेदशास्त्रा ध्ययनेन चापि भक्त्यैव जानाति पुमान् महेशीम् ॥ ६-९॥

तामेव भक्त्या सततं भजस्व सर्वार्थदां कृष्ण तवास्तु भद्रम् ।
इत्यूचुषि ब्रह्मसुते गते स व्यासस्तपोऽर्थं गिरि मारुरोह ॥ ६-१०॥

इहास्मि पर्याकुल चित्त वृत्तिः गुरुं न पश्यामि महत्तमं च ।
सन्मार्गतो मां नय विश्वमातः प्रसीद मे त्वां शरणं व्रजामि ॥ ६-११॥